
1075CH10

# 10


# समयः

**छात्राः एतानि उदाहरणानि पश्यन्तु —**


- अधुना दशवादनं संवृत्तम्।
- सार्धदशवादने अहं बहिः गच्छामि
- इदानीं रात्रेः नववादनम्।
- पादोनदशवादने शय्यां गच्छामि।
- माता — पुत्र! षड्वादनं जातम्!
- पुत्र — आम् मातः। उत्तिष्ठामि। मया तु सार्धसप्तवादने विद्यालयं प्रति गन्तव्यम् अस्ति।
- सम्प्रति अष्टवादनं जातम्।
- एकादशवादने मित्रम् आगच्छति।




द्वादशवादनम्



दशवादनम्




सपादसप्तवादनम्



पादोनपञ्चवादनम्

© NCERT not to be republished




सार्धनववादनम्

## अभ्यास:

**1. अधोलिखितवाक्येषु उदाहरणानुसारं समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत– उदाहरणम्—**

द्वितलीयरेलवाहनं .................. (10:15) वादने जयपुरं प्राप्नोति।

द्वितलीयरेलवाहनं सपाददशवादने जयपुरं प्राप्नोति।

(i) पुरुषोत्तम-एक्सप्रेस इति रेलयानं .................. (9:30) वादने पुरीत: प्रस्थानं करोति।

(ii) चेतक-एक्सप्रेस इति रेलयानं .................. (4:45) वादने दिल्लीम् आगच्छति।

(iii) हावड़ा-एक्सप्रेस .................. (11:00) वादने हावड़ास्थानकं प्राप्नोति।

(iv) रेलयानमेकं .................. (8:15) उत्तराञ्चलं प्रति गच्छति।

**2. अधोलिखितवाक्येषु उदाहरणानुसारं समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत– उदाहरणम्—**

माता प्रात: ..................(5:00) वादने उत्तिष्ठति।

माता प्रात: पञ्चवादने उत्तिष्ठति।

(i) राहुल: प्रातर्भ्रमणाय .................. (6:15) वादने उद्यानं गच्छति।

(ii) मल्लिका .................. (7:30) वादने प्रातराशं करोति।

(iii) अनन्या .................. (5:45) वादने क्रीडति।

(iv) सर्वे .................. (10:00) वादने शयनं कुर्वन्ति।।



© NCERT not to be republished

**3. अधोलिखितवाक्येषु समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत—**

**उदाहरणम्—**

प्रातः .................... (7:00) वादनतः .................... (7:45) वादनपर्यन्तं विद्यालये प्रार्थनासभा भवति।

प्रातः सप्तवादनतः पादोनाष्टवादनपर्यन्तं विद्यालये प्रार्थनासभा भवति।

(i) .................... (8:15) वादनतः .................... (9:00) वादनपर्यन्तं विज्ञानविषयस्य कालांशः भवति।

(ii) वयं .................... (9:00) वादनतः .................... (9:45) वादनपर्यन्तं गणितविषयं पठामः।

(iii) .................... (2:45) वादनतः .................... (3:30) वादनपर्यन्तं हिन्दीभाषाकालांशः भवति।।

(iv) संस्कृतशिक्षकः .................... (10:15) वादने अध्यापयति।

**4. अधोलिखितवाक्येषु समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत—**

**उदाहरणम्—**

छात्रः ....................(5:00) वादने उत्तिष्ठति ....................(6:15) वादने व्यायामं करोति।

छात्रः पञ्चवादने उत्तिष्ठति सपादषड्वादने व्यायामं करोति।

(i) छात्रः.................... (7:30) वादने प्रातराशं कृत्वा ....................(9:45) वादने विद्यालयं गच्छति।

(ii) .................... (4:00) वादने गृहमागत्य .................... (4:30) वादनपर्यन्तं विश्रामं करोति।

(iii) .................... (5:00) वादने भोजनं कृत्वा .................... (9:30) वादनपर्यन्तम् अध्ययनं करोति।

(iv) रात्रौ .................... (9:45) वादनतः ....................(5:00) वादनपर्यन्तं शयनं करोति।



© NCERT not to be republished